नं. १०

नारायणवर्मे

६१८।श्लो. ९९

नं. १०

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः ॥ नारायणवर्मांग भूत मंत्र
न्यासा लिख्यंते ॥ ॐ ॐ पादयोः ॥ ॐ नं ॐ
जानुनोः ॥ ॐ मों ॐ ऊर्वोः ॥ ॐ नां ॐ उदरे ॥
ॐ रां ॐ हृदि ॥ ॐ यं ॐ उरसि ॥ ॐ णां ॐ मु
खे ॥ ॐ यं ॐ शिरसि ॥ उत्पत्ति न्यासाः ॥ अ
थ संहार न्यासाः ॥ ॐ ॐ ॐ शिरसि ॥ ॐ नं ॐ
मुखे ॥ ॐ मों ॐ उरसि ॥ ॐ नां ॐ हृदि ॥ ॐ रां

A Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2)

॥नाथ॥ ॥३॥

ॐ उदरे ॥ ॐ यं ॐ ऊर्वोः ॥ ॐ थां ॐ जानुनोः ॥
ॐ यं ॐ पादयोः ॥ इति संहारन्यासः ॥ इति
अष्टाक्षरन्यासः ॥ ॐ ॐ ॐ दक्षिण तर्जन्यां ॥
ॐ नं ॐ मध्यमायां ॥ ॐ मों ॐ अनामिकायां ॥
ॐ भं ॐ कनिष्ठिकायां ॥ ॐ गं ॐ वामकनि
ष्ठिकायां ॥ ॐ वं ॐ अनामिकायां ॥ ॐ ते ॐ
मध्यमायां ॥ ॐ वां ॐ तर्जन्यां ॥ ॐ सं ॐ द

॥रामप ॥३॥

2A7

क्षिणांगुष्ठाधःपर्वणि ॥ ॐ हूं ॐ दक्षिणांगुष्ठो
र्ध्वपर्वणि ॥ ॐ वां ॐ वामांगुष्ठाधःपर्वणि ॥
ॐ यं ॐ वामांगुष्ठोर्ध्वपर्वणि ॥ इति द्वादशाक्ष
रन्यासः ॥ अथ षडक्षरन्यासः ॥ ॐ ॐ ॐ हृ
दये ॥ ॐ विं ॐ मूर्धनि ॥ ॐ षं ॐ भ्रूमध्ये ॥ ॐ
णं ॐ शिखायां ॥ ॐ वें ॐ नेत्रयोः ॥ ॐ नं ॐ स
र्वसंधिषु ॥ ॐ मः ॐ अस्त्राय फट् ॥ इति दिग्बंधः ॥

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3)

॥ना०॥ इति षडक्षरन्यासः ॥ श्रीराजोवाच ॥ यया गुप्तः
सहस्राक्षः सवाहान्रिपुसैनिकान् ॥ क्रीडन्नि
॥२॥ व विनिर्जित्य त्रिलोक्या बुभुजे श्रियं ॥१॥ भग
वंस्तन्ममाख्याहि वर्म नारायणात्मकं ॥ यथा
ततायिनः शत्रून्येन गुप्तोऽजयन्मृधे ॥२॥ श्री
शुक उवाच ॥ वृतः पुरोहितस्त्वाष्ट्रो महेंद्राया ॥राम॥
नुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकम ॥२॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

(3A)

नाः शृणु ॥३॥ विश्वरूप उवाच ॥ धौतांघ्रिपाणि
राचम्य सपवित्र उदङ्मुखः ॥ कृतस्वांगकरन्या
सो मंत्राभ्यां वाग्यतः शुचिः ॥ नारायणपरं व
र्म संनह्येद्भय आगते ॥४॥ पादयोर्जानुनोरू
२ र्वोरुदरे हृद्यथोरसि ॥ मुखे शिरस्यानुपूर्व्या दों
कारादीनि विन्यसेत् ॥५॥ ॐ नमो नारायणा
येति विपर्ययमथापि वा ॥ करन्यासं ततः कु

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(4)

॥ना०॥ प्यर्थाद्वादशाक्षरविग्रहा ॥६॥ त्रणवादियका
रांतमेंशुल्यं गुह्यपर्वे स्मृ ॥ न्यसेद्धृदय ॐकारं
॥७॥ विकारमनुमूर्धनि ॥७॥ षकारं तु भ्रुवोर्मध्ये
दि णकारं शिखयोशी नमो वे कारं नेत्रयोर्पं ज्याभ
कारं सर्वसंधिषु ॥८॥ मकारं मस्त्रमुद्दिस्यमं
त्रमुर्तिर्भवेद्बुधः ॥ सा विसर्गे फडंतं तत्सर्व ॥राम॥
दिक्षु विनिर्दिशेत् ॥९॥ ॐ विश्वेन मइत्ति ॥ ॥७॥

(4A)

आत्मानं परमं ध्याये ध्येयं षट्शक्तिभिर्युतं ।
विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत् ॥१०॥
ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिप
द्मः पतगेंद्रपृष्ठे । दरारिचर्मासिगदेषुचाप
पाशान्दधानोष्टगुणोष्टबाहुः ॥११॥ जलेतु
मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य
पाशात् । स्थलेषु मायाबटुवामनोव्यात्त्रिवि

(5)

॥मा०॥ क्रमः स्वेवतु विश्वरूपः ॥१२॥ दुर्गेष्वटव्याजिमु
॥४॥ खादिषु प्रभुः पायान्नृसिंहो सुरयूथपारिः ।
विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यप
तंश्च गर्भाः ॥१३॥ रक्षत्वसौ माध्वनि यज्ञक
ल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोद्रिकूटे
घ ष्वथ विप्रवासे सलक्ष्मणोव्याद्भरताग्रजोमोप ॥रामू॥
॥१४॥ मामुग्रधर्माद खिलात्प्रमादान्नारायणः पा ॥४॥

(5A)

सिधरो जनार्द्दनः॥ दामोदरो व्यादनुसंध्यं प्रभाते विश्वे
श्वरो भगवान् कालमूर्त्तिः॥२१॥ चक्रं युगांतानलतिग्म
निमि भ्रमत्समंताद्भगवत्प्रयुक्तं॥ दंदग्धि दंदग्ध्यरिसैन्य
माशु कक्षं यथा वातसखो हुताशः॥२२॥ गदेशनिस्पर्श
नविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि॥ कूष्मां
डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन्॥२३॥
त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टी
न्॥ दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोरेर्हृदया

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(61)

॥ना॰॥ निष्कंपयन् ॥२३॥ त्वं तिग्मधारासिवरारिसैन्यमीश
प्रयुक्तो मम छिंधि छिंधि ॥ चक्षूंषि चर्मंच्छतचंद्र छा
॥६॥ दय द्विषाम घोनां हर पापचक्षुषां ॥२४॥ यन्नो भयं
ग्रहेभ्यो भूत्केतुभ्यो नृभ्य एव वा ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो
भूतेभ्योंहोभ्य एव वा ॥२६॥ सर्वाण्येतानि भगवन्ना
मरूपास्त्रकीर्तनात् ॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयः ॥राम॥
प्रतीपकाः ॥२७॥ गरुडो भगवान्स्तोत्रस्तोभश्छंदोम ॥६॥
यः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनाम

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(6A)

भिः ॥२८॥ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ॥
बुद्धीन्द्रियमनःप्राणान्पांतु पार्षदभूषणाः ॥२९॥ यथा
हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः
सर्वे यांतु नाशमुपद्रवाः ॥३०॥ यथैकात्म्यानुभावा
नां विकल्परहितः स्वयं ॥ भूषणायुधलिंगाख्या ध
त्ते शक्तीः स्वमायया ॥३१॥ तेनैव सत्यमानेन सर्वज्ञो
भगवान्हरिः ॥ पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः
॥३२॥ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भग

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7)

॥ना०॥ बान्वारसिंहःनम्रहापयंक्लोकभयंस्वनेनसत्तेजसा
॥७॥ ग्रस्तसमस्ततेजाः॥३३॥मघवन्निरमाख्यातंवर्मेना
रायणात्मकं॥विजेष्यस्यजसायेनदंशितोसुरयूथपा
न्॥३४॥ ॥एतद्धारयमाणस्तुयंयंपश्यतिचक्षु
षा॥पदावासंस्पृशेत्सद्यःसाध्वसात्सविमुच्यते॥
३५॥नकुतश्चिद्भयंतस्यविद्यांधारयतोभवेत्॥ ॥राम०॥
राजदस्युग्रहादिभ्योव्याघ्रादिभ्यश्चकर्हिचित्॥ ॥७॥

(7A)

॥३६॥इमांविद्यांपुराकश्चित्कौशिकोधारयन्द्विजः॥
योगधारणयास्वांगंजहौसमरुधन्वनि॥३७॥तस्यो
परिविमानेनगंधर्वपतिरेकदा॥ययौचित्ररथःस्त्री
भिर्वृतोयत्रद्विजक्षयः॥३८॥गगनोन्यपतत्सद्यः
सविमानोह्यवाक्शिराः॥सवालखिल्यवचनादस्थी
न्यादायविस्मितः॥३९॥प्रास्यप्राचीसरस्वत्यांस्नात्वा
धामस्वमन्वगात्॥ ॥श्रीशुकउवाच॥ ॥यइदंशृणु

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

॥ना॥०॥ यात्काले यो धारयति चादृतः ॥ तं नमस्यंति भूतानि मु
॥छ॥ च्यते सर्वतो भयात् ॥४०॥ एतां विद्यामधिगतो विश्व
रूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृ
धेऽसुरान् ॥४१॥ इति श्रीमद्भागवते महापुराणे पार
महंस्यां संहितायां षष्ठस्कंधे अष्टमोध्यायः ॥८॥ श्री ॥ राम॥
कृष्णार्पणमस्तु ॥ ॥ श्री पांडुरंगार्पणमस्तु ॥छ॥ ॥छ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥ना०॥
॥६॥

॥इति नारायण[illegible]वर्मसमाप्तं॥

॥राम॥
॥६॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com